✧˖°*❋ ❋*°˖✧

# ગણેશ કવચમ્

# Ganesha Kavach: of sri Ganesh puran

in **gujarati**

✧˖°*❋ ❋*°˖✧

# ॥ ગણેશ કવચમ્ ॥

એષોતિ ચપલો દૈત્યાન્ બાલ્યેપિ નાશયત્યહો ।
અગ્રે કિં કર્મ કર્તેતિ ન જાને મુનિસત્તમ ॥ 1 ॥

દૈત્યા નાનાવિધા દુષ્ટાસ્સાધુ દેવદ્રુમઃ ખલાઃ ।
અતોસ્ય કંઠે કિંચિત્ત્યં રક્ષાં સંબદ્ધુમર્હસિ ॥ 2 ॥

ધ્યાયેત્ સિંહગતં વિનાયકમમું દિગ્બાહુ માદ્યે યુગે
ત્રેતાયાં તુ મયૂર વાહનમમું ષડ્બાહુકં સિદ્ધિદમ્ । ઈ
દ્વાપરેતુ ગજાનનં યુગભુજં રક્તાંગરાગં વિભું તુર્યે
તુ દ્વિભુજં સિતાંગરુચિરં સર્વાર્થદં સર્વદા ॥ 3 ॥

વિનાયક શ્શિખાંપાતુ પરમાત્મા પરાત્પરઃ ।
અતિસુંદર કાયસ્તુ મસ્તકં સુમહોત્કટઃ ॥ 4 ॥

લલાટં કશ્યપઃ પાતુ ભ્રૂયુગં તુ મહોદરઃ ।
નયને બાલચંદ્રસ્તુ ગજાસ્યસ્ત્યોષ્ઠ પલ્લવૌ ॥ 5 ॥

જિહ્વાં પાતુ ગજક્રીડશ્ચુબુકં ગિરિજાસુતઃ ।
વાચં વિનાયકઃ પાતુ દંતાન્ રક્ષતુ દુર્મુખઃ ॥ 6 ॥

શ્રવણૌ પાશપાણિસ્તુ નાસિકાં ચિંતિતાર્થદઃ ।
ગણેશસ્તુ મુખં પાતુ કંઠં પાતુ ગણાધિપઃ ॥ 7 ॥

સ્કંધૌ પાતુ ગજસ્કંધઃ સ્તને વિઘ્નવિનાશનઃ ।
હૃદયં ગણનાથસ્તુ હેરંબો જઠરં મહાન્ ॥ 8 ॥

ધરાધરઃ પાતુ પાર્શ્વૌ પૃષ્ઠં વિઘ્નહરશ્શુભઃ ।
લિંગં ગુહ્યં સદા પાતુ વક્રતુંડો મહાબલઃ ॥ 9 ॥

ગજક્રીડો જાનુ જંઘો ઊરૂ મંગળકીર્તિમાન્ ।
એકદંતો મહાબુદ્ધિઃ પાદૌ ગુલ્ફૌ સદાવતુ ॥ 10 ॥

ક્ષિપ્ર પ્રસાદનો બાહુ પાણી આશાપ્રપૂરકઃ ।
અંગુળીશ્ચ નખાન્ પાતુ પદ્મહસ્તો રિનાશનઃ ॥ 11 ॥

સર્વાંગાનિ મયૂરેશો વિશ્વવ્યાપી સદાવતુ ।
અનુક્તમપિ યત્ સ્થાનં ધૂમકેતુઃ સદાવતુ ॥ 12 ॥

આમોદસ્ત્વગ્રતઃ પાતુ પ્રમોદઃ પૃષ્ઠતોવતુ ।
પ્રાચ્યાં રક્ષતુ બુદ્ધીશ આગ્નેય્યાં સિદ્ધિદાયકઃ ॥ 13 ॥

દક્ષિણસ્યામુમાપુત્રો નૈઋત્યાં તુ ગણેશ્વરઃ ।
પ્રતીચ્યાં વિઘ્નહર્તા વ્યાદ્વાયવ્યાં ગજકર્ણકઃ ॥ 14 ॥

કૌબેર્યાં નિધિપઃ પાયાદીશાન્યાવિશનંદનઃ ।
દિવાવ્યાદેકદંત સ્તુ રાત્રૌ સંધ્યાસુ યઃવિઘ્નહૃત્ ॥ 15 ॥

રાક્ષસાસુર બેતાળ ગ્રહ ભૂત પિશાચતઃ ।
પાશાંકુશધરઃ પાતુ રજસ્સત્ત્વતમસ્સ્મૃતીઃ ॥ 16 ॥

જ્ઞાનં ધર્મં ચ લક્ષ્મી ચ લજ્જાં કીર્તિં તથા કુલમ્ । ઈ
વપુર્ધનં ચ ધાન્યં ચ ગૃહં દારાસ્સુતાન્સખીન્ ॥ 17 ॥

સર્વાયુધ ધરઃ પૌત્રાન્ મયૂરેશો વતાત્ સદા ।
કપિલો જાનુકં પાતુ ગજાશ્વાન્ વિકટોવતુ ॥ 18 ॥

ભૂર્જપત્રે લિખિત્વેદં યઃ કંઠે ધારયેત્ સુધીઃ ।
ન ભયં જાયતે તસ્ય યક્ષ રક્ષઃ પિશાચતઃ ॥ 19 ॥

ત્રિસંધ્યં જપતે યસ્તુ વજ્રસાર તનુર્ભવેત્ ।
યાત્રાકાલે પઠેદ્યસ્તુ નિર્વિઘ્નેન ફલં લભેત્ ॥ 20 ॥

યુદ્ધકાલે પઠેદ્યસ્તુ વિજયં ચાપ્નુયાદ્ધ્રુવમ્ ।
મારણોચ્ચાટનાકર્ષ સ્તંભ મોહન કર્મણિ ॥ 21 ॥

સપ્તવારં જપેદેતદ્દનાનામેકવિંશતિઃ ।
તત્તત્ફલમવાપ્નોતિ સાધકો નાત્ર સંશયઃ ॥ 22 ॥

એકવિંશતિવારં ચ પઠેત્તાવદ્દિનાનિ યઃ ।
કારાગૃહગતં સદ્યો રાજ્ઞાવધ્યં ચ મોચયોત્ ॥ 23 ॥

રાજદર્શન વેળાયાં પઠેદેતત્ ત્રિવારતઃ ।
સ રાજાનં વશં નીત્વા પ્રકૃતીશ્ચ સભાં જયેત્ ॥ 24 ॥

ઇદં ગણેશકવચં કશ્યપેન સવિરિતમ્ ।
મુદ્ગલાય ચ તે નાથ માંડવ્યાય મહર્ષયે ॥ 25 ॥

મહ્યં સ પ્રાહ કૃપયા કવચં સર્વ સિદ્ધિદમ્ ।
ન દેયં ભક્તિહીનાય દેયં શ્રદ્ધાવતે શુભમ્ ॥ 26 ॥

અનેનાસ્ય કૃતા રક્ષા ન બાધાસ્ય ભવેત્ વ્યાચિત્ ।
રાક્ષસાસુર બેતાળ દૈત્ય દાનવ સંભવાઃ ॥ 27 ॥

**॥ ઇતિ શ્રી ગણેશપુરાણે શ્રી ગણેશ કવચં સંપૂર્ણમ્ ॥**

✧ₓ……°*❋ ❋*°……ₓ✧

Free download PDF of all types of mantra, stotram,vandana,arati: chalisapdf.net